# vAmanastotram from Padmapurana

# વામનસ્તોત્રમ્ પદ્મપુરાણાન્તર્ગતમ્

## Document Information

Text title : vAmanastotram padmapurANAntargatam

File name : vAmanastotrampadmapurANa.itx

Category : vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA

Description-comments : From PadmapurANa

Latest update : July 12, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# વામનસ્તોત્રમ્ પદ્મપુરાણાન્તર્ગતમ્

શ્રીગણેશાય નમઃ ।
અદિતિરુવાચ ।
નમસ્તે દેવદેવેશ સર્વવ્યાપિન્ જનાર્દન ।
સત્ત્વાદિગુણભેદેન લોકવ્યાપારકારિણે ॥ ૧॥

નમસ્તે બહુરૂપાય અરૂપાય નમો નમઃ ।
સર્વૈકાદ્ભુતરૂપાય નિર્ગુણાય ગુણાત્મને ॥ ૨॥

નમસ્તે લોકનાથાય પરમજ્ઞાનરૂપિણે ।
સદ્ભક્તજનવાત્સલ્યશીલિને મઙ્ગલાત્મને ॥ ૩॥

યસ્યાવતારરૂપાણિ હ્યર્જયન્તિ મુનીશ્વરાઃ ।
તમાદિપુરુષં દેવં નમામીષ્ટાર્થસિદ્ધયે ॥ ૪॥

યં ન જાનન્તિ શ્રુતયો યં ન જાનન્તિ સૂરયઃ ।
તં નમામિ જગદ્ધેતું માયિનં તમમાયિનમ્ ॥ ૫॥

યસ્યાવલોકનં ચિત્રં માયોપદ્રવવારણમ્ ।
જગદ્રૂપં જગત્પાલં તં વન્દે પદ્મજાધવમ્ ॥ ૬॥

યો દેવસ્ત્યક્તસઙ્ગાનાં શાન્તાનાં કરુણાર્ણવઃ ।
કરોતિ હ્યાત્મના સઙ્ગં તં વન્દે સઙ્ગવર્જિતમ્ ॥ ૭॥

યત્પાદાબ્જજલક્લિન્નસેવારઞ્જિતમસ્તકાઃ ।
અવાપુઃ પરમાં સિદ્ધિં તં વન્દે સર્વવન્દિતમ્ ॥ ૮॥

યજ્ઞેશ્વરં યજ્ઞભુજં યજ્ઞકર્મસુ નિષ્ઠિતમ્ ।
નમામિ યજ્ઞફલદં યજ્ઞકર્મપ્રબોધકમ્ ॥ ૯॥

અજામિલોઽપિ પાપાત્મા યન્નામોચ્ચારણાદનુ ।
પ્રાપ્તવાન્પરમં ધામ તં વન્દે લોકસાક્ષિણમ્ ॥ ૧૦॥

બ્રહ્માદ્યા અપિ યે દેવા યન્માયાપાશયન્ત્રિતાઃ ।
ન જાનન્તિ પરં ભાવં તં વન્દે સર્વનાયકમ્ ॥ ૧૧॥

હૃત્પદ્મનિલયોઽજ્ઞાનાં દૂરસ્થ ઇવ ભાતિ યઃ ।
પ્રમાણાતીતસદ્ભાવં તં વન્દે જ્ઞાનસાક્ષિણમ્ ॥ ૧૨॥

યન્મુખાદ્બ્રાહ્મણો જાતો બાહુભ્યઃ ક્ષત્રિયોઽજનિ ।
તથૈવ ઊરુતો વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥ ૧૩॥

મનસશ્ચન્દ્રમા જાતો જાતઃ સૂર્યશ્ચ ચક્ષુષઃ ।
મુખાદિન્દ્રસ્તથાગ્નિશ્ચ પ્રાણાદ્વાયુરજાયત ॥ ૧૪॥

ત્વમિન્દ્રઃ પવનઃ સોમસ્ત્વમીશાનસ્ત્વમન્તકઃ ।
ત્વમગ્નિર્નિરૃતિશ્ચૈવ વરુણસ્ત્વં દિવાકરઃ ॥ ૧૫॥

દેવાશ્ચ સ્થાવરાશ્ચૈવ પિશાચાશ્ચૈવ રાક્ષસાઃ ।
ગિરયઃ સિદ્ધગન્ધર્વા નદ્યો ભૂમિશ્ચ સાગરાઃ ॥ ૧૬॥

ત્વમેવ જગતામીશો પુન્નામાસ્તિ પરાત્પરઃ । var યન્નામાસ્તિ
ત્વદ્રૂપમખિલં તસ્માત્પુત્રાન્મે પાહિ શ્રીહરે ॥ ૧૭॥

ઇતિ સ્તુત્વા દેવધાત્રી દેવં મત્વા પુનઃ પુનઃ । var નત્વા
ઉવાચ પ્રાઞ્જલિર્ભૂત્વા હર્ષાશ્રુક્ષાલિતસ્તની ॥ ૧૮॥

અનુગ્રાહ્યાઽસ્મિ દેવેશ હરે સર્વાદિકારણ ।
અકણ્ટકશ્રિયં દેહિ મત્સુતાનાં દિવૌકસામ્ ॥ ૧૯॥

અન્તર્યામિન્ જગદ્રૂપ સર્વભૂતપરેશ્વર ।
તવાજ્ઞાતં કિમસ્તીહ કિં માં મોહયસિ પ્રભો ॥ ૨૦॥

તથાપિ તવ વક્ષ્યામિ યન્મે મનસિ વર્તતે ।
વૃથાપુત્રાસ્મિદેવેશ રક્ષોભિઃ પરિપીડિતા ॥ ૨૧॥

એતાન્ન હન્તુમિચ્છામિ મત્સુતા દિતિજાતયઃ । var દિતિજા યતઃ
તાનહત્વા શ્રિયં દેહિ મત્સુતાનામુવાચ સા ॥ ૨૨॥

ઇત્યુક્તો દેવદેવસ્તુ પુનઃ પ્રીતિમુપાગતઃ ।
ઉવાચ હર્ષયન્સાધ્વીં કૃપયાઽભિપરિપ્લુતઃ ॥ ૨૩॥

શ્રીભગવાનુવાચ ।
પ્રીતોઽસ્મિ દેવિ ભદ્રં તે ભવિષ્યામિ સુતસ્તવ ।

યતઃ સપત્નીતનયેષ્વપિ વાત્સલ્યશાલિની ॥ ૨૪॥

ત્વયા ચ મે કૃતં સ્તોત્રં પઠન્તિ ભુવિ માનવાઃ ।
તેષાં પુત્રા ધનં સમ્પન્ન હીયન્તે કદાચન ॥ ૨૫॥

અન્તે મત્પદમાપ્નોતિ યદ્વિષ્ણોઃ પરમં શુભમ્ ॥ ૨૬॥

ઇતિ શ્રીપદ્મપુરાણાન્તર્ગતં વામનસ્તોત્રં સમાપ્તમ્ ।

Proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

---

*vAmanastotram from Padmapurana*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*